## प्रस्त्योऽन्यतरस्याम् । (५४/३०३४)

प्रपूर्वात् स्त्यायतेः उत्तरस्य निष्ठातकारस्य अन्यतरस्यां मकारादेशो भवति । प्रस्तीमः । प्रस्तीमवान् । प्रस्तीतः । प्रस्तीतवान् । यदा मत्वं नास्ति, तदा 'संयोगादेरातो धातोर्यण्वतः' (८. २. ४३/३०१७) इत्यस्य पूर्वत्रासिद्धत्वात् संप्रसारणं प्रथमं क्रियते, तत्र कृते निमित्तव्याघातान् नत्वं न भवति ॥

## अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः । (५५/३०३५)

फुल्ल क्षीब कृश उल्लाघ इत्येते[1] निपात्यन्ते, न चेदुपसर्गा[2]दुत्तरा भवन्ति । फुल्लः इति 'ञिफला विशरणे' (धा. पा. ५१६) इत्येतस्माद् धातोरुत्तरस्य निष्ठातकारस्य लकारो निपात्यते । उत्वमिडभावश्च सिद्ध एव । क्तवत्वन्तस्याप्येतल्लत्वमिष्यते, फुल्लः, फुल्लवान् इति । क्षीबकृशोल्लाघाः इति क्षीबिकृशिभ्यामुत्पूर्वाच्च लाघेः [3]क्त-प्रत्ययस्य तलोपः इडभावश्च निपात्यते । कृते वा इटि इच्छब्दलोपः । क्षीबः । कृशः । उल्लाघः । अनुप-सर्गात् इति किम् ? प्रफुल्ताः सुमनसः । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । लाघेरुदो[4]ऽन्यः उपसर्गः प्रतिषिध्यते ।

[१२३] उत्फुल्लसम्फुल्लयोरिति [5]वक्तव्यम् । (म. भा. ३. ४०९)

उत्फुल्लः । सम्फुल्लः । परिकृशः इत्यत्र यः परिशब्दः स क्रियान्तरयोगात् कृशिं प्रत्यनुपसर्ग एव, परिगतः कृशः परिकृशः इति ॥

## नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् । (५६/३०३८)

नुद विद उन्द त्रा घ्रा ह्री इत्येतेभ्यः उत्तरस्य निष्ठातकारस्य नकार आदेशो भवति अन्यतरस्याम् । नुद -- नुन्नः, नुत्तः । विद -- विन्नः, वित्तः । उन्द -- समुन्नः, समुत्तः । त्रा -- त्राणः, त्रातः । घ्रा – घ्राणः, घ्रातः । ह्री -- ह्रीणः, ह्रीतः । ह्री इत्येतस्मादप्राप्तं नत्वम्, इतरेषां नित्यं प्राप्तं विकल्प्यते । 'विद विचारणे' (धा. पा. १४५१) [6]इत्यस्य विदेरिह[7] ग्रहणमिष्यते । [8]एवं ह्युक्तम् –

वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते ।
विन्तेर्विन्नश्च वित्तश्च भोगवित्तश्च विन्दतेः ॥

इति ॥

## न ध्याख्यापॄमूर्च्छिमदाम् । (५७/३०४०)

ध्या ख्या पॄ मूर्च्छि मद इत्येतेषां निष्ठातकारस्य नकारादेशो न भवति । ध्यातः । ध्यातवान् । ख्यातः । ख्यातवान् । पूर्तः । पूर्तवान् । मूर्तः । मूर्तवान् । मत्तः । मत्तवान् । रदाभ्याम् (८. २. ४२/३०१६), संयोगादेः (८. २. ४३/३०१७) इति च प्राप्तः प्रतिषिध्यते ॥

---

1. शब्दाः इत्यधिकम् क. इ. 2. उत्तरे क. इ. 3. क्तप्रत्यये ह. 4. अन्यत्र क. 5. उपसङ्ख्यानम क. इ 6. इत्येतस्य इ. 7. इह नास्ति इ. क. 8. एवमित्युक्तम् क, तर्हि उक्तम् ह.